त्वमपि शोभसे। रजन्या शोभते चन्द्रश्चन्द्रेणापि च यामिनी" सा०द०।

**अन्योन्याध्यास** पु० अन्योन्यस्मिन् अन्योन्यतादात्म्यस्याध्यासः आरोपः। वेदान्तिमतसिद्धे परस्परतादात्म्यारोपे यथा अन्तःकरणे चेतनाध्यासः, चेतने वा अन्तःकरणतादात्म्याध्यासः "जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः। तथा जीवे च कूटस्थः सोऽन्योन्याध्यास उच्यते" इति वृद्धाः।

**अन्योऽन्याभाव** पु० अन्योन्यस्मिन् अन्योऽन्यस्य अभावः। भेदे। भेदो हि यथा घटे पटस्य, तथा पटे घटस्य सदाऽस्ति, संसर्गाभावस्तु नैवं, घटे भूतलस्याभावेऽपि भूतले घटस्य कदाचित् सत्त्वसंभवेन सदाभावाभावात्। "अभावस्तु द्विधा संसर्गान्योऽन्याभावभेदत" इति भाषा० तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम् अन्योन्याभावत्वमिति मुक्ता०। तच्च अखण्डोपाधिरिति नान्योन्याश्रयः इति तु नव्याः।

**अन्योन्याश्रय** त्रि० अन्योन्यमाश्रयतीति आ+श्रि–अच्। परस्परसापेक्षे। न्यायमते तर्कविशेषे पु०। स च एकस्य ज्ञानादिजननाय यथाऽन्यज्ञानाद्यपेक्षा तथातस्य ज्ञानादिजननायेतरस्य ज्ञानापेक्षत्वेति स्वापेक्षापेक्षितत्वनिमित्तकोऽनिष्टः प्रसङ्गः। अपेक्षा च ज्ञप्तौ, उत्पत्तौ, स्थितौ च ग्राह्या तत्र ज्ञप्तौ "घटोऽयम् यद्येतद्घटज्ञानजन्यज्ञानविषयः स्यात् तदैतद्घटभिन्नः स्यात् तत्र स्वज्ञानस्य स्वज्ञानजन्यत्वेनानिष्टं प्रसज्येत स्वापेक्षापेक्षितज्ञानत्वात् स्वापेक्षितघटज्ञानरूपविषयस्य तज्जनकज्ञानविषयाद्भेदरूपमनिष्टञ्च सज्येत अतोघटस्य घटभेदप्रसङ्गोऽनिष्टः। उत्पत्तौ यथा घटोऽयं यद्येतद्घटजन्यजन्यः स्यात् तदैतद्घटभिन्नः स्यादित्यादि। एतद्घटस्य उत्पत्तौ एतद्घटजन्यसापेक्षत्वे कारणस्य कार्याद्भेदनियततया एतद्घटस्य एतद्घटभेदरूपोऽनिष्टःप्रसङ्गः। स्थितौ यथा घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तदा तथात्वेनोपलभ्येत न च तथा उपलभ्यते तथात्वे च घटस्य घटवृत्तित्वापत्तिरनिष्टा प्रसज्येत। एतेषु ज्ञप्तिविषयतयैव प्रायशोऽनिष्टप्रसङ्गः। सर्वत्र तन्मूलकमेव स्वग्रहसापेक्षग्रहसापेक्षग्रहकत्वमन्योन्याश्रयत्वं तत्र तत्र व्यवह्रियते। अतएव परस्परज्ञानसापेक्षज्ञानाश्रयोऽन्योन्याश्रय इति स्मार्तैरुक्तम्। एवञ्च अन्योन्यपदस्य तज्ज्ञाने, तदुत्पत्तौ, तत्स्थितौ च लक्षणा तदाश्रयः अन्योन्याश्रय इति त्रितयसाधारणः विग्रहः।

**अन्वक्ष** त्रि० अनुगतमक्षमिन्द्रियं गतिस०। प्रत्यक्षे, अनुपदे, अनुगते च। अक्ष्णः समीपम् अव्ययी० टच्समा०। चक्षुर्निकटे अव्य०।

**अन्वग्भाव** पु० अनूचोभावः। पश्चाद्गन्तृत्वे, आनुगत्ये।

**अन्वच्** त्रि० अनु+अन्च–क्विन्। अनुगामिनि, स्त्रियां ङीप्। "समानबन्धू अम्नते अनूची" ऋ० १,११३,२, अनूची अन्वञ्चन्त्याविति भा०। "तस्मादिमे अन्वञ्चश्च तीर्यञ्चश्च" श०ब्रा०। पशुश्वान्वक् कात्या० ६,५,६। अनु पश्चादञ्चतीति तद्व्या०। अनुपदे न० अव्य० अमरः। "अन्वग्ययौ मध्यमलोकपालइति" रघुः अनुपदं यथाविल्यर्थः स्वरादेराकृतिगणत्वेन तद्गणीयः अनुमाने अव्य० प्रो०मनो०।

**अन्वन्** त्रि० अन–वनिप्। अनुगन्तरि। "अन्वासि रात्र्येति" ता०ब्रा० स्त्रियां ङीप्। भाष्यकृता तु अनुपूर्व्वाद्वातेरेतद्रूपमित्युक्तम्। तेन अनु+वा–क प्र० रूपसिद्धिः। स्त्रियां टाप्।

**अन्वय** पु० अनु+इण्–भावे अच्। सन्ततौ, अनुगतौ, "जन्माद्यस्य यतोऽन्वयादिति" भाग०। वृत्तौ, आनुकूल्ये, कार्य्ये–कारणस्यानुसरणे, कार्य्यसत्तापादकस्वसत्ताकस्य कारणस्य कार्य्ये स्थितौ, स्वसत्तानियतसत्तावत्कार्य्यसंबन्धे, च। कर्त्तरि अच्। वंशे तस्य पूर्व्वपुरुषदेहावयवानुगमनात्तथात्वम्। "तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तर" इति "रघूणामन्वयं वक्ष्ये" इति "तस्यान्वये भूपतिरेष जात" इति "अथ स्तुते वन्दिभिरन्वयज्ञैरिति" च रघुः पदानां, स्वोपस्थाप्यपदार्थानां वा परस्परसंबन्धे। "तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने" इति सा०द० "परस्परनिरपेक्षाणामेकस्मिन्नन्वयः समुच्चय" इति सि० कौ०। "मुख्यार्थस्येतराक्षेपो वाक्यार्थान्वयसिद्धये" इति सा०द०। तत्त्वे तत्सत्त्वरूपे, "गुणानां तदन्वयव्यतिरेकानुविधायित्वादिति" सा०द०। अन्वेति इन्द्रियम् कर्त्तरि अच्। प्रत्यक्षे, "स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम्। निरन्वयं भवेत् स्तेयमिति" मनुः। अनुगतमात्रे त्रि०। "का त्वमेकाकिनी भीरु! निरन्वयजने वने" इति भट्टिः अनुगतजनशून्ये इत्यर्थः।

**अन्वयबोध** पु० एकपदार्थे धर्म्मिणि अपरपदार्थस्य अन्वयं सम्बन्धं बोधयति आकाङ्क्षादिना, बुध–णिच्–अण् उप० स०। शब्दज्ञानजन्ये शाब्दबोधरूपानुभवभेदे। स च बोधः न प्रत्यक्षं नाप्यनुमेति नैयायिकाः। किन्तु ततोविलक्षण-